श्री छिन्नमस्ता देवी हृदयं

श्री छिन्नमस्ता देवी हृदयं

श्रीपार्वत्युवाच |
श्रुतं पूजादिकं सम्यग्भवद्वक्त्राब्ज निस्सृतं |
हृदयं छिन्नमस्तायाः श्रोतुमिच्छामि सांप्रतं || 1 ||

श्री महादेव उवाच |
नाद्यावधि मया प्रोक्तं कस्यापि प्राणवल्लभे |
यत्त्वया परिपृष्टोऽहं वक्ष्ये प्रीत्यै तव प्रिये || 2 ||

ॐ अस्य श्रीछिन्नमस्ताहृदयस्तोत्रमहामंत्रस्य – भैरव ऋषिः – सम्राट् छंदः -छिन्नमस्ता देवता – हूं बीजं – ॐ शक्तिः – ह्रीं कीलकं – शत्रुक्षयकरणार्थे जपे विनियोगः ||

अथ करन्यासः |
ॐ ॐ अंगुष्ठाभ्यां नमः |
ॐ हूं तर्जनीभ्यां नमः |
ॐ ह्रीं मध्यमाभ्यां नमः |
ॐ क्लीं अनामिकाभ्यां नमः |
ॐ ऐं कनिष्ठिकाभ्यां नमः |
ॐ हूं करतलकरपृष्ठाभ्यां नमः |

अथ करन्यासः |
ॐ ॐ हृदयाय नमः |
ॐ हूं शिरसे स्वाहा |
ॐ ह्रीं शिखायै वषट् |
ॐ क्लीं नेत्रत्रयाय वौषट् |
ॐ ऐं कवचाय हुं |
ॐ हूं अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः |

ध्यानं |

रक्ताभां रक्तकेशीं करकमललसत्कर्तृकां कालकांतिं
विच्छिन्नात्मीयमुंडासृगरुणबहुळां चक्रधारां पिबंतीं |
विघ्नाभ्रौघप्रचंडश्वसनसमनिभां सेवितां सिद्धसंघैः
पद्माक्षीं छिन्नमस्तां छलकरदितिजच्छेदिनीं संस्मरामि || 1 ||

वंदेऽहं छिन्नमस्तां तां छिन्नमुंडधरां परां |
छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदां || 2 ||

सर्वदा सुरसंघेन सेवितांघ्रिसरोरुहां |
सेवे सकलसंपत्यै छिन्नमस्तां शुभप्रदां || 3 ||

यज्ञानां योगयज्ञाय या तु जाता युगे युगे |
दानवांतकरीं देवीं छिन्नमस्तां भजामि तां || 4 ||

वैरोचनीं वरारोहां वामदेमविवर्धितां |
कोटिसूर्यप्रभां वंदे विद्युद्वर्णाक्षिमंडितां || 5 ||

निजकंठोच्छलद्रक्तधारया या मुहुर्मुहुः |
योगिनी गणसंस्तुत्या तस्याश्चरणमाश्रये || 6 ||

हूमित्येकाक्षरं मंत्रं यदीयं युक्तमानसः |
यो जपेत्तस्य विद्वेषी भस्मतां याति तां भजे || 7 ||

हूं स्वाहेति मनुं सम्यग्यस्स्मरत्यार्तिमान्नरः |
छिनत्ति छिन्नमस्ताया तस्य बाधां नमामि तां || 8 ||

यस्याः कटाक्षमात्रेण क्रूरभूतादयो द्रुतं |
दूरे तस्य पलायंते छिन्नमस्तां भजामि तां || 9 ||

क्षितितलपरिरक्षाक्षांतरोषा सुदक्षा
छलयुतकलकक्षाच्छेदने क्षांतिलक्ष्या |
क्षितिदितिजसुपक्षा क्षोणिपाक्षय्यशिक्षा
जयतु जयतु चाक्षा छिन्नमस्तारिभक्षा || 10 ||

कलिकलुषकलानां कर्तने कर्त्रिहस्ता
सुरकुवलयकाशा मंदभानुप्रकाशा |
असुरकुलकलापत्रासिकाकालमूर्ति-
र्जयतु जयतु काळी छिन्नमस्ता कराळी || 11 ||

भुवनभरणभूरी भ्राजमानानुभावा
भव भव विभवानां भारणोद्भातभूतिः |
द्विजकुलकमलानां भासिनी भानुमूर्ति-
र्भवतु भवतु वाणी छिन्नमस्ता भवानी || 12 ||

मम रिपुगणमाशु च्छेत्तुमुग्रं कृपाणं
सपदि जननि तीक्ष्णं छिन्नमुंडं गृहाण |
भवतु तव यशोऽलं छिंधि शत्रून्कलान्मे
मम च परिदिशेष्टं छिन्नमस्ते क्षमस्व || 13 ||

छिन्नग्रीवा छिन्नमस्ता छिन्नमुंडधराऽक्षता |
क्षोदक्षेमकरी स्वक्षा क्षोणीशाच्छादन क्षमा || 14 ||

वैरोचनी वरारोहा बलिदानप्रहर्षिता |
बलियोजितपादाब्जा वासुदेव प्रपूजिता || 15 ||

इति द्वादशनामानि छिन्नमस्ता प्रियाणि यः |
स्मरेत्प्रातस्समुत्थाय तस्य नश्यंति शत्रवः || 16 ||

यां स्मृत्वा संति सद्यः सकलः सुरगणाः सर्वदा संपदाढ्याः
शत्रूणां संघमाहत्य विशदवदनाः स्वस्थचित्ताः श्रयंति |
तस्याः संकल्पवंतः सरसिजचरणस्संततं संश्रयंति
साऽऽद्या श्रीशादिसेव्या सुफलतु सुतरां छिन्नमस्ता प्रशस्ता || 17 ||

हृदयमितिमज्ञात्वा हंतुमिच्छति यो द्विषं |
कथं तस्याचिरं शत्रुर्नाशमेष्यति पार्वति || 18 ||

यदीच्छेन्नाशनं शत्रोः शीघ्रमेतत्पठेन्नरः |
छिन्नमस्ता प्रसन्नापि ददाति फलमीप्सितं || 19 ||

शत्रुप्रशमनं पुण्यं समीप्सितफलप्रदं |
आयुरारोग्यदं चैव पठतां पुण्यसाधनं || 20 ||

इति श्रीनंद्यावर्ते महादेवपार्वतीसंवादे श्रीछिन्नमस्ताहृदयस्तोत्रं संपूर्णं ||